International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 163-165
© 2022 IJSR
www.anantaajournal.com
Received: 26-04-2022
Accepted: 14-06-2022

**प्रणति कुमारी साहु**
प्रोफ़ेसर, संस्कृतविभागाध्यक्षा,
रमादेवी-महिला-विश्वविद्यालय,
भूवनेश्वर, ओडिशा, भारत

**Corresponding Author:**
**प्रणति कुमारी साहु**
प्रोफ़ेसर, संस्कृतविभागाध्यक्षा,
रमादेवी-महिला-विश्वविद्यालय,
भूवनेश्वर, ओडिशा, भारत

# साम्प्रतिकस्थितौ काव्यशास्त्राध्ययनम्

## प्रणति कुमारी साहु

**शोधसारः**
समाजेऽस्मिन् अधुनातनकाले मानवाः काव्यशास्त्रपठनविमुखाः भवन्ति। तेषां रूचिस्तु अन्येस्मिन् बिषये यादृशी दृश्यन्ते तावत् आकर्षता काव्यशास्त्रे नैव परिलक्ष्यते। यत्द्वारा अद्यतनसमाजे काव्यशास्त्राध्ययनं, तस्य उपयोगिता महत्वादयश्च क्षुर्णं जायते। अतः साम्प्रतिकस्थितौ काव्यशास्त्रस्य उपयोगिता तस्याध्ययनमवगमनं तथा स्वस्य जीवने तस्य प्रयोगादिकं कथं मानवस्य स्वकीयमुल्यवोधकता परिपुष्णाति पुनश्च समाजस्य कल्याणसाधनं स्पष्टरूपेण साधयति तदेव मम शोधपत्रस्य विषयोऽस्ति। यत् मया स्पष्टतया प्रतिपादितास्ति पत्रेस्मिन्।

**कूट शब्दः** समाजेऽस्मिन् अधुनातनकाले, काव्यशास्त्रपठनविमुखाः, साम्प्रतिकस्थितौ काव्यशास्त्रस्य

## प्रस्तावना

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवतर्त्तते [1] इति विश्वजनीनतवास्तविकसिद्धान्तं सर्वे अनुसरन्ति । आकीटपतङ्गं सर्वेषां प्राणीनां सर्वदा प्रवृत्तिः किमपि प्रयोजनम् उद्दिश्य एव भवति। यदि साधारणजनानां किमपि कार्यं प्रयोजनं विना न जायते तर्हि कवेः लोकोत्तरनिपुणवर्णनं कथं निष्प्रयोजनं स्यात् ? अतएव अस्माकं भारतीयशास्त्रकाराः काव्यशास्त्रणां प्रारम्भे विषय-सम्बन्घ-प्रयोजन-अधिकारीरूपम् अनुवन्धचतुष्टयं प्रतिपादयन्ति, ततः यथार्थेनोक्तं यत् –

सर्वस्यैव शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ।। [2]

नियमानुसारेण प्रारम्भादेव काव्यप्रयोजनं नाट्यशास्त्रे महामुनिभरतेन कथितम् –

दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्वीनाम् ।
विश्रामजननं लोके नाट्यमेतद् भविष्यति ।।
धर्म्यं यशस्यमायुस्यं हितं बुद्धिविवर्धनम् ।
लोकोपदेशजननं नाट्यमेतद् भविष्यति ।।
वेदविद्येतिहसानामाख्यानपरिकल्पनम् ।

---

[1]. सर्व.वे.सि.स.- श्लो.11
[2]. त.वा.1.12

एवं प्रकारेण ऐहिकानि परलौकिकानि च प्रयोजनानि प्रतिपादितानि।
अस्माकं साम्प्रतिकजीवने काव्यशास्त्राणां प्रयोजनं वर्तते वा न इति नाम विचारः संक्षेपेण उपस्थाप्यते। अधुना विज्ञानस्य अभूतपूर्वविकाशः सर्वत्रानुभूयते। विज्ञानवलेन आश्चर्यजनक-आविष्काराणि सर्वत्र दृश्यन्ते। विज्ञानस्य नित्यनूतनसिद्धान्तैः अस्माकं प्रचलित धार्मिकभावना धराशायी भवति। यतः प्रायतः धार्मिक-आध्यात्मिकसिद्धान्ताः न प्रायोगिका अपितु स्वानुभूतिसम्पन्नाः।
अर्थोपार्जने, ज्ञानहरणे वयं सर्वे एतादृशाः कर्मतत्पराः भवामः यत् आनन्द-शान्ति-सन्तोषादयः शब्दा अस्माकं जीवनेभ्यः दूरीभूताः शास्त्रगता इति मन्यन्ते। शिक्षाक्षेत्रे दृश्यते विद्यालय- महाविद्यालय-विश्वविद्यालयेषु पाठ्यपुस्तकेषु शिक्षकछात्राः एतादृशः मग्नाः भवन्ति यत् सत्ग्रन्थानां पठनपाठनेषु आग्रहः न दृश्यते। न केवलं संस्कृतशास्त्राणाम् अपितु अन्यभाषाविरचितानां ग्रन्थानां प्राचीनसमुन्नतविचाराः नोद्धारिताः भवन्ति। सम्प्रति समग्रा पृथिवी करोना विभिषिकया कवलिता। तद्जनितानाम् आलोचनाकलननानां प्रभावात् सर्वे भयभूता आशंकिताश्च। करोनायाः विविधतरङ्गभयेन वयं सर्वेकवलिताः। प्राकृतकोष्ठरोगवत् करोनासंक्रमणेन समाजे गृहवद्धता-निःसंगता-मानसिकदुर्वलतादिरूपं वातावरणं वृद्धिर्भवति। पुनः शिशूनाम् अवस्था शोचनीया भवति। ते विद्यालयान् न गच्छन्ति, मित्रैः सह न मिलिताः भवन्ति, स्वाधीनतया न विचरन्ति च। अतस्ते मानसिकतया भारक्रान्ताः विषादग्रस्थाश्च। करोनाजनित-निःसंगता दूरीकरणार्थं ड. विवेकमूर्तिमहोदयानां विरचितग्रन्थः “टुगेदर्” विचारणीयः। ड. मूर्तिमहोदयः आमेरिकाराष्ट्रस्य पूर्वतनराष्ट्रमुख्य-ओवामाकाले तथा सम्प्रति राष्ट्रमुख्य वाइडेन्काले च सर्जन्-जेनेरालपदेन विभूषिताः सन्ति। चिकित्सक-वैज्ञानिक-समाजसंस्करकैः सहालोच्य ते प्रतिपादयन्ति यत् करोनाजन्यनिःसङ्गता दूरीकरणार्थं, गृहावद्धछात्राणां सरससुन्दरजीवनार्थं नवीनोपाया अनुकरणीयाः। दूरदर्शनस्य विविधधारावाहिकदर्शनात्, नकारात्मक-भिडियोगेम्प्रभावात् ते विमुखाः भवेयुः। उत्तममानसिकस्वास्थ्यवर्धनार्थं परिवारे आत्मीयानां सानिध्यं, उपादेयग्रन्थपठनादीनाम् आवश्यकता अनुभूयते। विश्वस्वास्थ्यसंगठनेनापि सकारात्मकज्ञानोदयार्थं सद्ग्रन्थपठनमावश्यकमिति मतं प्रदत्तम्।
अस्मिन् संकटापन्नस्थितौ संस्कृतकाव्यशास्त्राणां का भूमिका वर्तते इति विचारणीया। संगरोधजनितानिःसङ्गतां दूरीकर्तुं काव्यजगतः धर्म-कर्म-आत्मज्ञानप्रभाव सर्वादौ स्वीकार्यः। कवेः कर्म स्मृतं काव्यम्। लोकोत्तरवर्णनानिपुण-कविकर्म काव्यमिति काव्यस्य सामान्यरूपं जानन्तरपि काव्यशास्त्रकारैः तस्य विविधविशिष्टलक्षणानि प्रतिपाद्यन्ते। भामह-वामन-रुद्रट-आनन्दवर्धन-अभिनवगुप्त-कुन्तक-वाग्भट-हेमचन्द्र-मम्मट-विद्याधरप्रभृतिभि आचार्यैः निर्दुष्टं गुणालङ्कारसमन्वितं च शब्दार्थयुगलं काव्यमिति स्वीकृतम्। दण्डि-जयदेव-विश्वनाथ-जगन्नाथप्रभृतिभिः आचार्यैः इष्टार्थप्रतिपादकस्य शब्दस्यैव काव्यत्वमङ्गीकृतम्। संस्कृतसाहित्याकाशस्य देदीप्यमाननक्षत्रेण पण्डितराजजगन्नाथेन स्वकीये “रसगङ्गाधर” ग्रन्थे “रमणीयार्थप्रतिपादिकः शब्दः काव्यम्” इति काव्यलक्षणं प्रतिपादयति। तस्य मते यथा वेद-पुराण-लक्षणस्य शब्दनिष्ठता तथैव काव्यलक्षणस्यापि शब्दनिष्ठता वर्त्तते।

वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये।
जगतःपितरौ वन्दे पार्वतीपरमेश्वरौ।।[3] इति

कविकुलगुरोः कालिदासस्य रघुवंशमहाकाव्यस्तुतिपरकश्लोके काव्यस्य शब्दार्थयुगलात्मकत्वं सुस्पष्टमेव। अतः अस्माभिः संहत्यर्थं सुस्थमानसिकताविकाशार्थम् उत्तमार्थसम्वलितशब्दाः व्यवहार्याः। वयाकरणानां स्फोटतत्वमपि अस्मिन् क्षेत्रे विचारयोग्याः। शब्दस्य सृजनशक्तिवद् विनाशशक्तिरपि वर्तते। गृहेषु एव सर्वे सदस्याः यदि शुद्धशब्दोच्चारणं वाग्माधुर्यञ्च प्रदर्शयन्ति तर्हि शिशवः तान् अनुसरिस्यन्ति नास्ति सन्देहः।
काव्यशास्त्राध्ययने रसो वै सः इति विचारस्य प्रभावः अतीव युगोपयोगी वत्तते। सर्वे आनन्दमिच्छन्ति। निखिलमिदं जगत् मोहमायाप्रपञ्चितम्। सकलं जगत् सच्चिदानन्दमयस्य परंब्रह्मणः शुक्तिकायां रजतमिव विवर्तरूपं सुवर्णस्य कुण्डलमिव परिणामरूपं इति अधुना अस्माभिः न विचार्यन्ते। काव्यानुशीलनात् सन्तोषः प्राप्नोति आनन्दः वर्धते च। गृहेषु शिक्षायतनेषु वा नाट्यप्रदर्शनेन सत्काव्यग्रन्थपठनेन च परमानन्दप्राप्तिः सुनिश्चिता एव। धनञ्जयेन स्वीकृतं यत् आनन्दप्राप्तिरेव काव्यस्य परमप्रयोजनम्। यथार्थेन उक्तम्-

आनन्दनिष्यन्दिषु रूपकेषु व्युत्पत्तिमात्रं
फलमल्पवुद्धिः।
योऽपीतिहासदिवदाह साधुस्तस्मै नमः
स्वादुपराङ्मुखाय।।

सत्काव्यविरचनात्, श्रवणात्, उपयोगाः च जीवनं धन्यं भवति। इहलोके असाधारणं कामादिसुखं परत्रं मोक्ष्याख्यं परमं सुखं च लभते। काव्यशास्त्राणि देवस्तुतिपरकाणि आध्यात्मिकवार्तासमन्वितानि च ! सत्काव्यस्य देवस्तुत्या दुस्तरविपदोत्तीर्णं, रोगविमोचनं स्वाभिलाषपुरणञ्च भवन्ति

[3] . रघु.वं.1.1

इति कविनां विश्वासः। काव्येन एव सरसानां शृङ्गारादिप्रियाणां सहृदयानां चतुर्वर्गफलप्राप्तिः शीघ्रेण मृदुनोपायेन च प्राप्यते।
काव्यानुशीलनेन मानवस्य व्यवहारसाधुतापि परिवर्धते। चिन्ता मार्जिता, भाषा मधुरा, कार्यं सकारात्मकम्, सदाचाराभ्यासः सच्चरित्रनिर्माणं च भवति। लौकिकव्यवहारदृष्ट्या सुन्दरसमुचितज्ञानं सत्काव्यादेव भवति। काव्यं कान्ता इव सरसतापूर्वं रामादिवत् प्रवर्तनीयं न रावणादिवत् इति उपदेशान् ददाति। महामारीकरोनपरिस्थितौ प्रायतः परिवारेषु अर्थाभावात् विवादावसादादयः दृश्यन्ते। फलतः परिवारजनेषु सम्बन्धहानिर्भवति। यदि परिवारे मूलतः सदाचार-नैतिकता-सुसम्बन्धप्रभावः स्यात् तर्हि एतादृशी दूरावस्था न भविष्यति। "काव्यमानन्दाय यशसे कान्तातुल्योपदेशाय" इति रीत्या काव्यानां सुललितपदोपयोगपूर्वं शृङ्गारादिरसास्वादः कटुकौषधसेवनपराङ्मुखस्य कृते मधुमिश्रितसेवनवद् भवति।

## उपसंहारम्

महामारीकरोनापरिस्थितिम् आकल्य सामाजिकपारिवारिकस्थितिं विलोक्य एतत् वक्तुं शक्यते यत् विविधविकल्पमाध्यमेन मानसिकावसादसम्बन्धहानिप्रभृतीनां निराकरणं भवेत्। अन्तःशक्तिविकाशार्थं सुस्थमानसिकतावृद्ध्यर्थं यत् यत् आत्मकर्मधर्मज्ञानम् आवश्यकं संस्कृतकाव्यशास्त्राणाम् अवदानम् अवश्यं वीचारणीयम्। रोगप्रभावः विपर्यादयः सर्वदा स्थास्यन्ति। परन्तु तेषां सम्मुखीकरणार्थं प्रेम-सम्बन्ध-एकतामन्त्राः नितान्तावश्यकाः। कथ्यते यदा विज्ञानं परास्तं भवति तदा भगवद्शक्तिः प्रारभ्यते इति सर्वे जानन्ति विगतवर्षे स्फुटनिक्महाकाशयाने आमेरिकीयवैज्ञानिकद्वयस्य भगवद्प्राथनायां चमत्कारिताविषये। पाश्चात्यकाव्यशास्त्रस्य आद्याचार्येण अरस्तूमहोदयेन त्रासकरुणयोरुद्रेकेण तादृशमनोविकाराणां विरेचनद्वारा आनन्दानुभूतिः अर्थात् त्रासादीरूपस्य उत्कृष्टनाट्यकाव्यस्य प्रयोजनं प्रतिपादितम्। कलासौन्दर्यमेव कलायाः प्रयोजनम्। सौन्दर्यवोधः केवलं काव्यकलायाः विषयः। अतः एव लोकोपदेशजननं नाट्यमेतद् भविष्यति इत्यादि भरतोक्तं तथा काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् इत्यादि युक्तियुक्तं संगच्छ्यन्ते। अधुना शिक्षानीतौ शिक्षायतनेषु च काव्यशास्त्राणां प्रयोजनम् एकान्तमावश्यकम् अत्र नास्ति मनागपि सन्देहलेशः।

## संकेताक्षरसूचि

| | | |
|---|---|---|
| सर्व.वे.सि.स. | – | सर्ववेदान्तसिद्धान्तसारसंग्रहः |
| त.वा. | – | तन्त्रवार्तिकम् |
| ना.शा. | – | नाट्यशास्त्रम् |
| रघु. वं | – | रघुवंशम् |

## संदर्भ

1. सर्ववेदान्तसिद्धान्तसारसंग्रहः – पं. रामस्वरूपशर्मा – भारतीय विद्या प्रकाशन – वाराणसी – 2013
2. तन्त्रवार्तिकम् – श्रीकुमारिलस्वामि – वेनारससंस्कृतमहाविद्यालयस्य अध्यापकाः – वेनारस प्रिण्टिङ्प्रेस्, विद्याभिला प्रेस – वेनारस् - 1903
3. नाट्यशास्त्रम् – भोलानाथ शर्मा – साहित्य निकेतन – कानपुर - 1954
4. रघुवंशम् – डाँ. श्रीकृष्णमणि त्रिपाठी – चौखम्बा सुरभारती प्रकाशन – वाराणसी - 2020